# सार्थ पंचमुखी हनुमत्कवचम् ॥

ॐ श्रीहरिगुरुभ्यो नमः ।। हरिः ॐ ।।

अस्य श्रीपंचमुखी-वीर-हनुमत्कवचन- स्तोत्रमंत्रस्य ब्रह्मा ऋषिः।

गायत्री छन्दः ।

पंचमुखी श्रीरामचंद्ररूपी परमात्मा देवता ।।

बीजम्। न्हीं शक्तिः । चंद्रः इति कीलकम् ।।

पंचमुखांतर्गत श्रीरामचंद्ररूपी परमात्मा-प्रसाद- सिद्ध्यर्थे जपे विनियोगः ।।

करन्यासः I

ॐ हां अंगुष्ठांभ्यां नमः ।।

ॐ हीं तर्जनीभ्यां नमः ।।

ॐ हूं मध्यमाभ्यां नमः ।।

ॐ हैं अनामिकाभ्यां नमः ।।

ॐ हौं कनिष्ठिकाभ्यां नमः ।।

ॐ हः करतलकरपृष्ठाभ्यां नमः ।।

इति करन्यासः।

हृदयादि न्यासः ।

ॐ हां हृदयाय नमः ।

ॐ हीं शिरसे स्वाहा।

ॐ हूं शिखायै वषट।

ॐ हैं कवचाय हूं।

ॐ हौं नेत्रत्रयाय वौषट् ।

ॐ हः अस्त्राय फट् ।

इति हृदयादि न्यासः । ॐ भूर्भुवस्वरोम् । अथ दिग्बंधः।

ॐ कं खं गं घंङ्चं छं जं झं ञं टं ठं डं ढं णं तं थंदं

धं नं पं फं बं भं मं यं रंलं वंशं षं सं हं ळं क्षं ज्ञं स्वाहा।

अथ ध्यानम् ॥

वंदे वानर नारसिंह-खगराट्- क्रोट्रा-अश्व-वक्त्रान्वितम् ।

दिव्यालंकरणं त्रिपंचनयनं दैदीप्यमानं स्रजा ॥

हस्ताब्जैरसिखेट-पुस्तकसुधा-कुंभं कुशादीन् हलान् ।

खट्वांगं कनिभूरुहं दशभुजं सर्वारिदर्पापहम् ॥१॥

पंचवक्त्रं महाभीमं त्रिपंचनयनैर्युतम् ।

दशभिर्बाहुभिर्युक्तं सर्वकामार्थ-सिद्धिदम् ॥२॥

पूर्वे तु वानरं वक्त्रं कोटिसूर्य समप्रभम् ।

दंष्ट्राकरालवदनं भृकुटीकुटिलेक्षणम् ॥३॥

अन्यं तु दक्षिणे वक्त्रं नारसिंहं महाद्भुतम् ।

अत्युग्रतेजो ज्वलितं भीषणं भयनाशनम् ॥४॥

पश्चिमे गारुडं वक्त्रं वज्रतुंडं महाबलम् ।

सर्वरोगप्रशमनं विषभूतादिकृंतनम् ॥५॥

उत्तरे सूकरं वक्त्रं कृष्णादित्यं महोज्वलम् ।

पातालसिद्धिदं नृणां ज्वररोगादिनाशनम् ॥६॥

ऊर्ध्वं हयाननं घोरं दानवान्तकरं परम् ।

येन वक्त्रेण विप्रेंद्र ! सर्वविद्याः विनिर्ययुः ॥७॥

एतत्पंचमुखं तस्य धारयत्तु भयंकरम् ।

खड्गं त्रिशूलं खट्वांगं परश्वंकुश पर्वतम् ॥८ ॥

खेटासीनि पुस्तकं च सुधाकुंभं हलं तथा ।

एतान्यायुधजातानि धारयन्तं भजामहे ॥९॥

प्रेतासनोपविष्टं तु दिव्याभरणभूषितं ।

दिव्यमालांबरधरं दिव्यगंधानुलेपनम् ॥१०॥

सर्वैश्वर्यमयं देवमनंतं विश्वतोमुखम् ।

एवं ध्यायेत्पंचमुखं सर्वकामफलप्रदम् ॥११॥

पंचास्यमच्युतमनेकविचित्रवीर्यम् । श्रीशंखचक्ररमणीयभुजाग्रदेशम् ।।

पीतांबरं मुकुटकुंडलंनूपुरांगम् । उद्योतितं कपिवरं हृदि भावयामि ॥१२॥

चंद्रार्धं चरणारविंदयुगलं कौपीनमौंजीधर ।

नाभ्यां वै कटिसूत्रबद्धवसनं यज्ञोपवीतं शुभम् ॥

हस्ताभ्यामवलम्ब्य चाञ्जलिपुटं हारावलिं कुंडलम् ।

बिभ्रद्दीर्घशिखं प्रसन्नवदनं विद्याञ्जनेयं भजे ॥१३॥

इति ध्यानम् ।।